**तुतात** पु॰ मीमांसकभेदे। तेन प्रोक्तं ठक्। तौतातिक तत्प्रोक्तमीमांसादर्शने। तन्मतञ्च दिङ्मात्रम् अर्हच्छब्दे ३८२ पृ॰ दर्शितम्। "नैवात्रापि गुरोर्मतं न विदितं तौतातिकं दर्शनम्" सा॰ द॰।

**तुतुर्वणि** पु॰ तूर्णीवनिर्भजनमस्य वेदे पृषो॰। १तूर्णभजने। "यज्ञायज्ञावः समानां तुतुर्वणिः" ऋ॰१।१६।१। "तुतुर्वणिः त्वरमाणः संभजमानः" भा॰। [ त्यत्-त।

**तुत्थ** स्तुतौ अद॰ चु॰ उभ॰ सक॰ सेट्। तुत्थयति ते अतुतु-

**तुत्थ** पु॰ तुद-थक्। १प्रावणि उणा॰। २अग्नौ संक्षिप्तसा॰। (तुंते) ३अञ्जनभेदे न॰। ४नील्याम्, ५सूक्ष्मैलायाञ्च स्त्री हेमच॰। स्वार्थे क। तत्रार्थे। रसनाञ्जनस्य गुणादिकं भावप्र॰ उक्तं यथा

"तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत्। किञ्चित्ताम्रगुणं तस्मात् वक्ष्यमाणगुणञ्च तत्। तुत्थकं कटुकं क्षारं कषायं वामकं लघु। लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत्। विषाश्मकुष्ठकण्डूघ्नं खर्परञ्चापि तद्गुणम्" भावप्र॰ अस्य शोधनम् "विष्ठायां मर्दयेत्तुत्थं मार्जारककपोतयोः। दशांशं टङ्कनं दत्त्वा पचेत् लघुपुटे ततः। पुटं दध्ना पुटं क्षौद्रैर्देयं तुत्थविशुद्धये" भावप्र॰ "कासीसं रोचनां तुत्थं हरितालं मनःशिलाम्" सुश्रुतः। [ २मयूरकण्ठे च राजनि॰।

**तुत्थाञ्जन** न॰ कर्म्म॰। १अञ्जनभेदे (तुंते)। तद्वर्णत्वात्

**तुथ** पु॰ तु-थक् तुद-बधे थक् पृषो॰ वा। १हननकर्त्तरि "तुथोऽसि जनधायो नभोऽसि" ताण्ड्यब्रा॰१।४।३। "तुद्यतेर्बधकर्म्मणः तुथः रक्षःप्रभृतीनां हन्ता" भा॰। २ब्रह्मणि। "तुथोऽसि विश्ववेदाः" यजु॰ ५।३१।

"हे ब्राह्मणाछंसिन् त्वं तुथो विश्ववेदाश्चासि। ब्रह्म वै तुथः" इति श्रुतेः। ब्रह्मरूपोऽसि। विश्वं वेत्ति विश्ववेदाः सर्वज्ञः। यद्वा तुथशब्देन देवान् प्रति दक्षिणानां विभागकर्त्ता पुरुष उच्यते तदाह तित्तिरिः "तुथो ह स्म वै विश्ववेदा देवानां दक्षिणा विभजतीति"। "ब्रह्मा वै तुथः" शत॰ ब्रा॰ ४।३।४।१६। श्रुतेः। ३दक्षिणाविभाजके ब्रह्मरूपे ३ऋत्विग्भेदे।

"तुथो वै विश्ववेदा विभजत्विति ब्रह्म वै तुथस्तदेना ब्रह्मणा विभजति। ब्रह्मा वै दक्षिणीयं चादक्षिणीयं च वेद तुथो ह्यस्यैता दक्षिणीयायैव दत्त्वा भजति नादक्षिणीयाय"। "रूपेण वो रूपनामभ्यां तुथो वो विश्ववेदा विभजतु"। यजु॰ ७।४५ "किं च तुथो ब्रह्मरूपः प्रजापति र्वो युष्मान् विभजतु यथायोग्यमृत्विग्भ्यो विभज्य ददातु "ब्रह्म वै तुथ इति श्रुतेः" वेददी॰।

**तुद** व्यथने तुदा॰उभ॰ सक॰अनिट्। तुदति ते अतौत्सीत्। अतुत्त तुतोद तुतुदे "तुतुदे गदयाचचारीन्"। "अतौत्सीत् गदयाङ्गदम्" भट्टिः। "इषुभिरिव मानसं कामिनां तुदति कुसुमचापः" ऋतु॰। "यथा तुदति मर्म्माणि" भा॰स॰२५।३०।

**तुदादि** पु॰ शप्रत्ययनिमित्ते धातुसमुदाये स च गणः कविकल्पे शानुबन्धेन पठितः। "तुदादिभ्यः शः" पा॰।

आ+सम्यग्व्यथने। "प्रतोदेनातुदन् भृशम्" मनुः। "धनुःकोट्यातुद्य कर्णेन वीरम्" भा॰ आ॰ १ अ॰।

निस्+निष्पीड़ने। "सूचिभिरिव निस्तुद्यते दश्यत इव पिपीलिकाभिः"। [इय तदपत्ये पुंस्त्री॰।

**तुद** त्रि॰ तुद-क। व्यथके। तस्यापत्यं शुभ्रा॰ ढक्। तौ-

**तुन्द** न॰ तणु अर्दने अदा॰ नि॰। उदरे अमरः।

**तुन्दकूपी** स्त्री ह्रस्वः कूपः कूपी तुन्दस्य कूपीव। १नाभौ त्रिका॰। स्वार्थे क। २तुन्दकूपिकाप्यत्र हेमच॰।

**तुन्दपरिमृज** पु॰ तुन्दं परिमार्ष्टि परि+मृज-क इत॰। १अलसे २मन्दे। अण्। तुन्दपरिमार्जोऽप्यत्र रमानाथः।

**तुन्दमृज** त्रि॰ तुन्दमुदरं मार्ष्टि मृज-क। १अलसे २मन्दे च हेमच॰।

**तुन्दादि** पु॰ "तुन्दादिभ्य इलच्च" पा॰ अस्त्यर्थे इलच्प्रत्ययनिमित्ते शब्दगणे स च गणः। पा॰ग॰सू॰ उक्तो यथा "तुन्द उदर पिचण्ड यवब्रीहि (स्वाङ्गाद्विवृद्धौ) विवृद्धौ कर्णौ यस्य सः कर्णिलः"। चादिनिठनौ मतुप् च। "तुन्दिलः तुन्दी तुन्दिकः तुन्दवान्" सि॰ कौ॰।

**तुन्दिक(ल)(भ)** त्रि॰ तुन्द विद्यतेऽस्य ठन्। तुन्दि+भ तुन्द+इलच् वा। तुन्दियुक्ते (भुँड़ि) युक्ते।

**तुन्दिकर** पु॰तुन्दिं करोति कृ-अच्। (भुँड़ि) युक्ते तुन्दिले त्रिका॰। [स्त्रियां ङीप्।

**तुन्दिन्** त्रि॰ तुन्दोऽस्त्यस्य इनि। तुन्दयुक्ते (भुँड़ि)युक्ते

**तुन्दिलफला** स्त्री तुन्दिलं बृहत्फलमस्याः। त्रपुषग्राम् (शशा) राजनि॰।

**तुन्न** पु॰ तुद-क्त। १नन्दिवृक्षे (तुंद) अमरः। २व्यथिते, ३छिन्ने च त्रि॰। स्वार्थे क। अत्रैवार्थे।

**तुन्नवाय** पु॰ तुन्नं छिन्नं वयति वे-अण्। १सौचिके, २सूच्याजीविनि (दरजी) अमरः। "शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च" मनुना तदन्नभक्षणं निषिद्धम्।